श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ अभीतिस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अभीतिस्तबकः ॥

अभयं भयमित्येतदुभयं सर्वदेहिनाम्।
यत्सेवातदभावाभ्यां तामहं श्रियमाश्रये॥ १ ॥

भजामि तां त्वां भवरोगभीतिं पयोधिकन्ये परिहर्तुकामः।
वह्नेर्भयं वायुभुवो ययैव न्यवारि तस्माच्च निशाचरीणाम्॥ २ ॥

प्रह्लादस्य भयं विनेतुमचिरादेकस्य शोकस्पृशो
लोकस्यैव भयङ्करं तव पतिर्जग्राह सैंहं वपुः।
त्रैलोक्याम्ब तदीयकोपदहनज्वालास्तु वेलातिगाः
चाटूक्तैरमृतैर्निवार्य भवती चक्रे जगन्निर्भयम्॥ ३ ॥

अशरणजनक्लेशालोकक्षणोपनतोद्धतेः
स तव हृदयम्लानेर्भीतो जगत्पतिरिन्दिरे।
अहह विहिते क्षाम्यन्नागः सहस्रमजस्रम-
प्यभयमुभयोराराात्तेभ्यः प्रयच्छति लोकयोः॥ ४ ॥

मुक्तस्त्वया मुह्यति साध्वसं गतः सर्वाम्ब युक्तं खलु साध्वसङ्गतः।
यस्त्वामुपासीत भयातिचञ्चलां चित्रं स धन्यो न भयातिचञ्चलः॥ ५ ॥

वन्देत मन्देतरनित्यबोधनन्दे मुकुन्देष्टपुरन्ध्रि यस्त्वाम्।
अत्रासमत्रासनमेति सैंहं चित्राममुत्रापि स याति ऋद्धिम्॥ ६ ॥

कारागारादपि किल भृशं तापदे पापदेहे
हन्ताहन्तामतिमतिविपन्मिश्रितामाश्रितानाम्।
पारावाराधिपतितनये मादृशामीदृशानां
हित्वा हि त्वा त्रिजगति गतिर्नेतरा कातराणाम्॥ ७ ॥

भावी यस्मिन् भगवति भवद्दृष्टिलेशः कृतार्थे
    त्रासोऽन्यासोपहतविपदस्तस्य न स्यात् कुतोऽपि।
अस्मिन्नर्थे जननि सुरसासिंहिकादेरभीतो
    लङ्कायामप्यविहतगती रामदासः प्रमाणम्॥ ८ ॥

जनिमृतिजराभीष्माद्ग्रीष्मातपोग्रतराद्भवात्
    जननि न वयं वित्रस्यामस्त्वदङ्कमुपाश्रिताः।
सति बलवदालम्बे स्याद्दुर्बलोऽप्यकुतोभयः
    त्रसति मृगयोः किं वा पद्मे मृगो विधुमाश्रितः॥ ९ ॥

अनाघ्राताः श्रौताः स्मृतिभिरुपदिष्टाश्च कमले
    समीचामाचारैरपि च विदिता धर्मनिचयाः।
कथङ्कारं घोरं निरयमतियायामिति भयं
    जहामि स्मृत्वा ते जगदवनवात्सल्यजलधेः॥ १० ॥

विवित्सामात्सर्यस्फुरणदुरहङ्कारकुहना
    पिशाचीभ्यो बिभ्यज्जगदभयदानैकनिरताम्।
नुतां भूतेशाद्यैरपगमितरक्षोगणमदां
    प्रपद्ये दासस्त्वां परमपुरुषप्राणदयिते॥ ११ ॥

जन्तोर्हन्त त्रिलोकीजननि तव समाराधनासाधनेषु
    व्यापारेष्वाभिमुख्यत्यजनभजनयोर्भीत्यभीती भवेताम्।
सुग्रीवं वालिभङ्गे तदहितदमनानुन्मुखं रामकोपाद्
    भीतं पश्चात्तदास्थावहनगतभियं तत्र दृष्टान्तयामः॥ १२ ॥

रक्षःस्तोमोऽप्यखिलभयकृद् राघवप्राणकान्ते
    त्रासोत्पत्त्यै न खलु भवति त्वत्पदाब्जानुकूले।
कष्टं मातस्तृणमपि भिये कल्पते त्वत्प्रतीपे
    प्राच्ये साक्षी पवनतनयः पश्चिमे काक एकः॥ १३ ॥

कान्तारे महतीव संसृतिपथे हन्त भ्रमन्तश्चिरं
    विष्णोः प्रेयसि वानरा इव नरा वेलातिगग्लानयः।

सम्पातेरिव सन्मतेरथ गुरोर्बुद्ध्वा स्थितिं तावकीम्
आज्ञालङ्घनभीतिमम्ब जहति प्राज्ञा हरेः स्वामिनः॥ १४ ॥

पादाब्जं भजनादिकर्मणि सुरैर्यस्यैव कर्मीकृतं
यो धत्तेऽर्कयमेन्द्रवह्निमरुतां भीतावपादानताम्।
तस्याप्यम्ब सकृत्कृतप्रपदनस्तेऽस्मीति याचन् जनो-
ऽप्यावासार्पणसांप्रदान्यमयते देवि प्रसादेन ते॥ १५ ॥

आरोढुं किल यत्सनीडममरा बिभ्यत्यहिद्विण्मुखाः
तद्ब्रह्मापि तवाश्रयेण सुलभीकर्तुं न भीतोऽस्म्यहम्।
लेढुं दाडिमकल्परत्नखचितं राज्ञः किरीटं रमे
किं वा सर्वदुरासदस्य दयिता केलीशुकस्त्रस्यति॥ १६ ॥

दातव्या स्वयमेव दाशरथये देवीति यो वीतभीः
अग्रे साग्रहमग्रजस्य कथयन्नार्तो दशास्यानुजः।
तस्मै त्वद्दयितेन दत्तमभयं प्राज्यं च राज्यं रमे
यत्स्वल्पं व्यसनं भवेत्तव कृते तद्भूयसे श्रेयसे॥ १७ ॥

तव साधु वर्ष्म नवसारसालये भवसागरान्तरवसादमेयुषाम्।
अभयाय भात्यशुभयातुदीप्तिहृत्प्रभया सुवर्णनिभया मनोरमम्॥ १८ ॥

प्रत्यासीदति मृत्युरन्वहमहो गत्यागतिभ्यां रवेः
पापीयानहमस्मि पापिनि जने कोपी च वैवस्वतः।
हा किं वा भवितेति वेङ्कटपतेः क्रीडासखि त्रस्यते
मह्यं गर्ह्यतमाय मातरभयं देयं दयालो स्वयम्॥ १९ ॥

परब्रह्मप्राणप्रणयिनि हरब्रह्ममघवन्
मुखानां लेखानामपि भयमभीतिश्च भवतः।
निमेषोन्मेषाभ्यां तव जननि दृष्ट्योरिति महान्
अयं घण्टाघोषः क इह विमृशेन्मानमपरम्॥ २० ॥

घनार्तौ कार्तान्तः कदननिपुणः किङ्करगणो
भ्रमद्भिर्लोकाम्ब क्रुधमिव वमद्भिश्च नयनैः।

प्रगल्भां दुर्भीतिं प्रथयति यथा मे न बहुधा
तथा शीतापाङ्गैः प्रसभमनुगृह्णातु भवती॥ २१॥

तत्तत्पापौघजफलतया दारुणैस्तन्यमाना
याम्याः श्रुत्वा मुनिवचनतो यातनाश्चेतनानाम्।
कामं भीतः कमलनिलये कम्पमानाखिलाङ्गो
विश्वस्य त्वामहमशरणो विश्वधात्रीं प्रपद्ये॥ २२॥

देशे काले सततविकृते देवि देहस्य वृत्ते
दृष्टे शौरेरघजुषि जने तीक्ष्णकोपे च चित्ते।
भीतिः प्रादुर्भवति महती शक्तिमत्या भवत्याः
कारुण्यार्द्रे मृदुनि हृदये चिन्तिते हन्त धैर्यम्॥ २३॥

बाधन्ते विषया बहिः सततमप्यन्तस्तु कामादयः
त्रातुं हन्त विपन्नमर्णवसुते धात्रादयोऽप्यक्षमाः।
शक्तो यद्यपि केशवः स तु दुराराध्यः स्वयं मद्विधैः
इत्युद्वेगवतो मम क्लमहरालोका त्वमेका गतिः॥ २४॥

वाल्मीकौ तमसान्वयो बलरिपौ भूयस्तरा मन्यवो
योगस्थे यमसङ्गतिर्दृढगदावाप्तिस्तु नारायणे।
रुद्रे क्षुद्रहितक्रमो भवकृतं दुःखं रतिप्रेयसि
त्रासः कुत्सितमौक्तिकेषु न पुनस्त्वत्संश्रितेष्विन्दिरे॥ २५॥

हन्त प्राकृतचक्षुराद्यविषये व्यापिन्यनिर्वाच्यतां
प्राप्ते विश्वजनिस्थितिक्षयपुषि ब्रह्मण्यनन्याश्रये।
मातस्त्वामभयं विधातुमुषितां मन्ये प्रतिष्ठामहं
तस्मिंस्ते दरमन्तरं भवति चेत्कस्यात्र न स्याद्भयम्॥ २६॥

दशमुखसहजं तं देवि नाम्नार्थतो वा-
प्युदितमुखविकारं भीतमप्यूष्मणाप्तम्।
अकुरुत रघुवीरस्त्वत्प्रसादप्रभावात्
अभयवितरणेन क्षिप्रमानन्दसान्द्रम्॥ २७॥

अल्पश्रुतेभ्य इव राशिमनादिवाचामंहस्ततिभ्य इव बिभ्यतमर्भकं ते।
पुण्यैः पुराणवचनैरिव वीक्षणैस्त्वमुच्चैर्नृसिंहसखि मामुपबृंहयेथाः॥ २८ ॥

दुष्कालानुगुणक्रमैः श्रुतिपथाविष्कारनिष्कासकैः
निष्कारुण्यतमैस्तुरुष्कयवनैर्निष्कारणत्रासिभिः।
कञ्जावासिनि तत्समैरपि जनैः सञ्जायमानं भयं
त्वं जालेन दृशां हि तारयसि नः खञ्जानिवाम्भोनिधिम्॥ २९ ॥

का काभयप्रदेति प्रश्नो यद्वाचकः समस्तपदः।
स्वयमुत्तरतां धत्ते रमा समस्तोत्तरा विराजति सा॥ ३० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे अभीतिस्तबकः ॥